# shaMpAkagItA

# શમ્પાકગીતા

## Document Information

Text title : shampAkagItA

File name : shampaakagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Professor Tokunaga in Kyoto system(?)

Proofread by : Sunder Hattangadi

Latest update : June 2, 1998

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શમ્પાકગીતા

અધ્યયઃ ૧૭૬
યુધિષ્ઠિર ઉવાચ ।
ધનિનશ્ચાધના યે ચ વર્તયન્તે સ્વતન્ત્રિણઃ ।
સુખદુઃખાગમસ્તેષાં કઃ કથં વા પિતામહ ॥ ૧॥

ભીષ્મ ઉવાચ ।
અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
શંપાકેનેહ મુક્તેન ગીતં શાન્તિગતેન ચ ॥ ૨॥

અબ્રવીન્માં પુરા કશ્ચિદ્બ્રાહ્મણસ્ત્યાગમાશ્રિતઃ ।
ક્લિશ્યમાનઃ કુદારેણ કુચૈલેન બુભુક્ષયા ॥ ૩॥

ઉત્પન્નમિહ લોકે વૈ જન્મપ્રભૃતિ માનવમ્ ।
વિવિધાન્યુપવર્તન્તે દુઃખાનિ ચ સુખાનિ ચ ॥ ૪॥

તયોરેકતરે માર્ગે યદેનમભિસન્નયેત્ ।
ન સુખં પ્રાપ્ય સંહૃષ્યેન્નાસુઃખં પ્રાપ્ય સઞ્જ્વરેત્ ॥ ૫॥

ન વૈ ચરસિ યચ્છ્રેય આત્મનો વા યદીશિષે ।
અકામાત્માપિ હિ સદા ધુરમુદ્યમ્ય ચૈવ હ ॥ ૬॥

અકિઞ્ચનઃ પરિપતન્સુખમાસ્વાદયિષ્યસિ ।
અકિઞ્ચનઃ સુખં શેતે સમુત્તિષ્ઠતિ ચૈવ હ ॥ ૭॥

આકિઞ્ચન્યં સુખં લોકે પથ્યં શિવમનામયમ્ ।
અનમિત્રપથો હ્યેષ દુર્લભઃ સુલભો મતઃ ॥ ૮॥

અકિઞ્ચનસ્ય શુદ્ધસ્ય ઉપપન્નસ્ય સર્વતઃ ।
અવેક્ષમાણસ્ત્રીઁલ્લોકાન્ન તુલ્યમિહ લક્ષયે ॥ ૯॥

આકિઞ્ચન્યં ચ રાજ્યં ચ તુલયા સમતોલયમ્ ।

અત્યરિચ્યત દારિદ્ર્યં રાજ્યાદપિ ગુણાધિકમ્ ॥ ૧૦॥

આકિઞ્ચન્યે ચ રાજ્યે ચ વિશેષઃ સુમહાનયમ્ ।
નિત્યોદ્વિગ્નો હિ ધનવાન્મૃત્યોરાસ્ય ગતો યથા ॥ ૧૧॥

નૈવાસ્યાગ્નિર્ન ચારિષ્ટો ન મૃત્યુર્ન ચ દસ્યવઃ ।
પ્રભવન્તિ ધનત્યાગાદ્વિમુક્તસ્ય નિરાશિષઃ ॥ ૧૨॥

તં વૈ સદા કામચરમનુપસ્તીર્ણશાયિનમ્ ।
બાહૂપધાનં શામ્યન્તં પ્રશંસન્તિ દિવૌકસઃ ॥ ૧૩॥

ધનવાન્ક્રોધલોભાભ્યામાવિષ્ટો નષ્ટ ચેતનઃ ।
તિર્યગીક્ષઃ શુષ્કમુખઃ પાપકો ભ્રુકુટીમુખઃ ॥ ૧૪॥

નિર્દશન્નધરોષ્ઠં ચ ક્રુદ્ધો દારુણભાષિતા ।
કસ્તમિચ્છેત્પરિદ્રષ્ટું દાતુમિચ્છતિ ચેન્મહીમ્ ॥ ૧૫॥

શ્રિયા હ્યભીક્ષ્ણં સંવાસો મોહયત્યવિચક્ષણમ્ ।
સા તસ્ય ચિત્તં હરતિ શારદાભ્રમિવાનિલઃ ॥ ૧૬॥

અથૈનં રૂપમાનશ્ચ ધનમાનશ્ચ વિન્દતિ ।
અભિજાતોઽસ્મિ સિદ્ધોઽસ્મિ નાસ્મિ કેવલમાનુષઃ ॥ ૧૭
ઇત્યેભિઃ કારણૈસ્તસ્ય ત્રિભિશ્ચિત્તં પ્રમાદ્યતિ ।
સમ્પ્રસક્તમના ભોગાન્વિસૃજ્ય પિતૃસઞ્ચિતાન્ ।
પરિક્ષીણઃ પરસ્વાનામાદાનં સાધુ મન્યતે ॥ ૧૮॥

તમતિક્રાન્તમર્યાદમાદદાનં તતસ્તતઃ ।
પ્રતિષેધન્તિ રાજાનો લુબ્ધા મૃગમિવેષુભિઃ ॥ ૧૯॥

એવમેતાનિ દુઃખાનિ તાનિ તાનીહ માનવમ્ ।
વિવિધાન્યુપપાન્તે ગાત્રસંસ્પર્શજાન્યપિ ॥ ૨૦॥

તેષાં પરમદુઃખાનાં બુદ્ધ્યા ભૈષજ્યમાચરેત્ ।
લોકધર્મમવજ્ઞાય ધ્રુવાણામધ્રુવૈઃ સહ ॥ ૨૧॥

નાત્યક્ત્વા સુખમાપ્નોતિ નાત્યક્ત્વા વિન્દતે પરમ્ ।
નાત્યક્ત્વા ચાભયઃ શેતે ત્યક્ત્વા સર્વં સુખી ભવ ॥ ૨૨॥

ઇત્યેતદ્ધાસ્તિનપુરે બ્રાહ્મણેનોપવર્ણિતમ્ ।
શંપાકેન પુરા મહ્યં તસ્માત્ત્યાગઃ પરો મતઃ ॥ ૨૩॥

ઇતિ શ્રીમહાભારતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ
શંપાકગીતાયાં ષટ્સપ્ત્યધિકશતતમોઽધ્યાયઃ ॥ ૧૭૬ ॥

॥ ઇતિ ॥

Adhyaya numbers 179 in shAntiparva, Mahabharata critical edition
(Bhandarkar Oriental Research Institute BORI).
In Kinjavadekar's edition they are 176.

Sunder Hattangadi

*shaMpAkagItA*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*